॥ ગીતાધ્યાનમ ॥
ઓમ પાર્થાય પ્રતિબોધિતામ ભગવતા નારાયણેન સ્વયમ વ્યાસેન
ગ્રથિતામ પુરાણમુનિના મધ્યે મહાભારતમ ।
દ્વૈતામ્રુતવર્ષિણીમ ભગવતીમ અષ્ટાદશાધ્યાયિનીમ અમ્બ
ત્વામનુસન્દધામિ ભગવદ્ગીતે ભવદ્વેષિણીમ ॥ ૧

નમો-સ્તુ તે વ્યાસ વિશાલબુદ્ધે ફુલ્લારવિન્દાયત પત્રનેત્ર ।
યેન ત્વયા ભારતતૈલ પૂર્ણઃ પ્રજ્વાલિતો ધ્યાનમયઃ પ્રદીપઃ ॥ ૨

પ્રપન્ન પારિજાતાય તોત્રવેત્રૈ કપાણયે ।
ધ્યાનમુદ્રાય કૃષ્ણાય ગીતા-મ્રુત્દુહે નમઃ ॥ ૩

સર્વોપનિષદો ગાવો દોગ્ધા ગોપાલનન્દનઃ ।
પાર્થો વત્સઃ સુધીર્ભોકતા દુગ્ધમ ગીતામ્રુતમ મહત ॥ ૪

વસુદેવસુતમ દેવમ કમ્સચાણૂર મર્દનમ ।
દેવકી પરમાનન્દમ કૃષ્ણમ વન્દે જગદ્ગુરુમ ॥ ૫

ભીષ્મદ્રોણતટા જયદ્રથજલા ગાન્ધારનીલોત્પલા શલ્યગ્રાહવતી કૃપેણ
વહની કર્ણેન વેલાકુલા ।
અશ્વત્થામ વિકર્ણ ઘોરમકરા દુર્યોધનાવર્તિની સોત્તીર્ણા ખલુ પાણ્ડવૈ
રણનદી કૈવર્તકઃ કેશવઃ ॥ ૬

પારાશર્ય વચસ્સરોજમમલમ ગીતાર્થગન્ધોત્કટમ નાનાખ્યાનકકેસરમ
હરિકથા સમ્બોધનાબોધિતમ ।
લોકે સજ્જન ષટ્પદૈરહરહઃ પેપીયમાનમ મુદા ભૂયાદ ભારતપઙ્કજમ
કલિમલપ્રધ્વમ્સિ નઃ શ્રેયસે ॥ ૭

મૂકમ કરોતિ વાચાલમ પઙ્ગુમ લઙ્ઘયતે ગિરિમ ।
યત્કૃપા તમહમ વન્દે પરમાનન્દ માધવમ ॥ ૮

યમ બ્રહ્મા વરુનેન્દ્ર રુદ્ર મરુતઃ સ્તુન્વન્તિ દિવ્યૈઃ સ્તવૈઃ ।
વેદૈઃ સાઙ્ગપદક્રમોપનિષદૈઃ ગાયન્તિ યમ સામગાઃ ॥
ધ્યાનાવસ્થિત તદ્ગતેન મનસા પશ્યન્તિ યમ યોગિનો યસ્યાન્તમ ન વિદુઃ
સુરાસુરગણાઃ દેવાય તસ્મૈ નમઃ ॥ ૯